# ३३ त्रयस्त्रिंश दशकः - गौतम कथा

शक्रः पुरा जीवगणस्य कर्म-दोषात्समाः पञ्चदश क्षमायाम् ।
वृष्टिं न चक्रे धरणी च शुष्क - वापी तडागादि जलाशयाऽऽसीत् ॥ ३३-१॥

सस्यानि शुष्काणि खगान् मृगांश्च भुक्त्वाऽप्यतृप्ताः क्षुधया तृषा च ।
निपीडिता मर्त्यशवानि चाहो मर्त्या अनिष्टान्यपि भुञ्जते स्म ॥ ३३-२॥

क्षुधाऽर्दिताः सर्वजना महाऽऽप - द्विमुक्ति कामा मिलिताः कदाचित् ।
तपोधनं गौतम मेत्य भक्त्या पृष्टा मुनिं स्वागम हेतु मूचुः ॥ ३३-३॥

विज्ञाय सर्वं मुनिराट् कृपालुः सम्पूज्य गाय त्र्यभिधां शिवे त्वाम् ।
प्रसाद्य दृष्ट्वा च तवैव हस्तात् लेभे नवं कामद पात्र मेकम् ॥ ३३-४॥

दुकूल सौवर्ण विभूषणान्न वस्त्रादि गावो महिषादयश्च ।
यद्यज्जनै रीप्सित माशु तत्तत् तत्पात्रतो देवि समुद्बभूव ॥ ३३-५॥

रोगो न दैन्यं न भयं न चैव जना मिथो मोदकरा बभूवुः ।
ते गौतम स्योग्र तपः प्रभावं उच्चै र्जगुस्तां करुणार्द्रतां च ॥ ३३-६॥

एवं समा द्वादश तत्र सर्वे निन्युः कदाचि न्मिलितेषु तेषु ।
श्रीनारदो देवि शशीव गायत्रि आश्चर्य शक्तिं प्रगृणन्नवाप ॥ ३३-७॥

स पूजितस्तत्र निषण्ण उच्चैः निवेद्य तां गौतम कीर्ति लक्ष्मीम् ।
सभासु शक्रादिसुरैः प्रगीतां जगाम सन्तो जहृषुः कृतज्ञाः ॥ ३३-८॥

काले धरां वृष्टि समृद्ध सस्यां दृष्ट्वा जना गौतम मानमन्तः ।
आपृच्छ्य ते सज्जन सङ्ग पूता मुदा जवात्स्वस्व गृहाणि जग्मुः ॥ ३३-९॥

दुःखानि मे सन्तु यतो मनो मे प्रतप्त सङ्घट्टित हेम शोभि ।
विशुद्ध मस्तु त्वयि बद्धरागो भवानि ते देवि नमोऽस्तु भूयः ॥ ३३-१०॥